(1034) "पूज पूजने" (X-चुरादिः 1643. सक. सेट्. उभ.)

पूजकः-जिका, पुपूजयिषकः-षिका, इत्यादीनि सर्वाणि रूपाणि चौरादिक-कूटयतिवत् (240) ज्ञेयानि। [1]पूजा, [A]पूज्यमानः, पूजयन्-न्ती, [राज्ञां] [2]पूजितः, राजपूजितः, इत्यादीनि रूपाण्यस्य धातोः विशेषेण संभवन्ति।

(1035) "पूञ् पवने" (IX-क्र्यादिः-1482. सक. सेट् उभ.)

प्वादिः, ल्वादिश्च। [अ]

'श्वि पुनाति पुनीते स्ताम्, पवने पवते ङितः।' (श्लो. 27) इति देवः।

पावकः-विका, पावकः-विका, [3]पुपूषकः-षिका, पोपूयकः-यिका;
पविता-त्री, पावयिता-त्री, पुपूषिता-त्री, पोपूयिता-त्री;
[4]पुनन्[B]-पुनाति, पावयन्-न्ती, [C]पुपूषन्-न्ती; —
पविष्यन्-न्ती-ती, पावयिष्यन्-न्ती-ती, पुपूषिष्यन्-न्ती-ती; —
पुनानः, पावयमानः, पुपूषमाणः, पोपूयमानः;
पविष्यमाणः, पावयिष्यमाणः, पुपूषिष्यमाणः, पोपूयिष्यमाणः;

---

1. 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इति स्त्रियां भावादौ युजपवादोऽङ्प्रत्ययः।

2. 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इति वर्तमाने क्तः। 'क्तस्य च वर्तमाने' (2-3-67) इति कर्तरि षष्ठी। 'क्तेन च पूजायाम्' (2-2-12) इति समास-निषेधः। राजपूजितः इति प्रयोगस्तु राज्ञा पूजितः इति तृतीयासमासे साधुः।

3. 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः। 'इको झल्' (1-2-9) इति सनः कित्त्वान्न गुणः। एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या।

4. शतरि 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः। 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे रूपमेवम्। एवं शानजन्तेऽपि प्रक्रिया ज्ञेया।

A. 'च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन॥' भ. का. 3, 56.

B. 'द्वारं पुनन् पदतलेन स लूनवैरी
स्तीर्णाननं मदजलेन करीतुकामम्।' धा. का. 3.6.

C. 'त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजान् पुपूषता।' शि. व. 14.7.

[अ] क्र्यादिषु क्षीरस्वामिना "दिवादौ—पूयते......।" इत्याद्युक्तम्। पूधातुः भ्वादौ, क्र्यादिषु च पठ्यते; न दिवादौ। क्षीरस्वामिनाऽपि दिवादिषु पूधातुः कुत्रापि न पठितः। तस्मात् क्षीरस्वामिवाक्यं क्र्यादिगतं किंनिबन्धनमिति न जानीमः।